# Shri Vishnu Stavaraja 2

# શ્રીવિષ્ણુસ્તવરાજઃ ૨

## Document Information

Text title : Shri Vishnu Stavaraja 2 03 13

File name : viShNustavarAjaH2.itx

Category : vishhnu, shataka, stavarAja, vishnu

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-13

Latest update : August 14, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 9, 2024

*sanskritdocuments.org*

Shri Vishnu Stavaraja 2

# શ્રીવિષ્ણુસ્તવરાજઃ ૨

(ભીષ્મસ્તવરાજઃ)

જનમેજય ઉવાચ-

શરતલ્પે શયાનસ્તુ ભરતાનાં પિતામહઃ ।
કથમુત્સૃષ્ટવાન્ દેહં કં ચ યોગમધારયત્ ॥ ૧॥

વૈશમ્પાયન ઉવાચ-

શૃણુષ્વાવહિતો રાજન્ શુચિર્ભૂત્વા સમાહિતઃ ।
ભીષ્મસ્ય કુરુશાર્દૂલ દેહોત્સર્ગં મહાત્મનઃ ॥ ૨॥

પ્રવૃત્તમાત્રે ત્વયન ઉત્તરે વૈ દિવાકરે ।
શુક્લપક્ષસ્ય ચાષ્ટમ્યાં માઘમાસસ્ય પાર્થિવ ॥ ૩॥

પ્રાજાપત્યે ચ નક્ષત્રે મધ્યં પ્રાપ્તે દિવાકરે ।
સમાવેશયદાત્માનમાત્મન્યેવ સમાહિતઃ ॥ ૪॥

વિકીર્ણાંશુરિવાદિત્યો ભીષ્મઃ શિતશરૈશ્ચિતઃ ।
શિશ્યે પરમયા લક્ષ્મ્યા વૃતો બ્રાહ્મણસત્તમૈઃ ॥ ૫॥

વ્યાસેન વેદવિદુષા નારદેન સુરર્ષિણા ।
દેવરાતેન વાત્સેન તથા શ્યેનસુમન્તુના ॥ ૬॥

તથા જૈમિનિના ચૈવ પૈલવેન મહાત્મના ।
શાણ્ડિલ્યદેવલાભ્યાં ચ મૈત્રેયેણ ચ ધીમતા ॥ ૭॥

અસિતેન વસિષ્ઠેન કૌશિકેન મહાત્મના ।
હરીતરોમશાભ્યાં ચ તથાત્રેયેણ ધીમતા ॥ ૮॥

બૃહસ્પતિશ્ચ શુક્રશ્ચ ચ્યવનશ્ચ મહામુનિઃ ।
સનત્કુમારકપિલૌ વાલ્મીકિસ્તુમ્બુરુઃ કુરુઃ ॥ ૯॥

મૌદ્ગલ્યો ભાર્ગવો રામસ્તૃણબિન્દુમહામુનિઃ ।

પિપ્પલાદશ્ચ વાયુશ્ચ સંવર્તઃ પુલહઃ કચઃ ॥ ૧૦॥

કાશ્યપશ્ચ પુલસ્ત્યશ્ચ ક્રતુર્દક્ષઃ પરાશરઃ ।
મરીચિરઙ્ગિરાઃ કણ્વો ગૌતમો ગાલવો મુનિઃ ॥ ૧૧॥

ધૌમ્યો વિભાણ્ડો માણ્ડવ્યો ધૌમ્રકૃષ્ણાનુભૌતિકઃ ।
ઉલૂકઃ પરમો વિપ્રો માર્કણ્ડેયો મહામુનિઃ ॥ ૧૨॥

ભાસ્કરઃ પૂરણઃ કૃષ્ણઃ સૂતઃ પરમધાર્મિકઃ ।
શૈબ્યેન યાજ્ઞવલ્ક્યેન શઙ્ખેન લિખિતેન ચ ॥ ૧૩॥

એતૈશ્ચાન્યૈર્મુનિગણૈર્મહાભાગૈર્મહાત્મભિઃ ।
શ્રદ્ધાદમપુરસ્કારૈર્વૃતશ્ચન્દ્ર ઇવ ગ્રહૈઃ ॥ ૧૪॥

ભીષ્મસ્તુ પુરુષવ્યાઘ્રઃ કર્મણા મનસા ગિરા ।
શરતલ્પગતઃ કૃષ્ણં પ્રદધ્યૌ પ્રાઞ્જલિઃ શુચિઃ ॥ ૧૫॥

સ્વરેણ હૃષ્ટપુષ્ટેન તુષ્ટાવ મધુસૂદનમ્ ।
યોગેશ્વરં પદ્મનાભં વિષ્ણું જિષ્ણું જગત્પતિમ્ ॥ ૧૬॥

કૃતાઞ્જલિઃ શુચિર્ભૂત્વા વાગ્વિદાં પ્રવરઃ પ્રભુઃ ।
ભીષ્મઃ પરમધર્માત્મા વાસુદેવમધાસ્તુવત્ ॥ ૧૭॥

ભીષ્મ ઉવાચ-
આરિરાધયિષુઃ કૃષ્ણં વાચં જિગદિષામિ યામ્ ।
તયા વ્યાસસમાસિન્યા પ્રીયતાં પુરુષોત્તમઃ ॥ ૧૮॥

શુચિં શુચિપદં હંસં તત્પદં પરમેષ્ઠિનમ્ ।
યુક્ત્વા સર્વાત્મનાત્માનં તં પ્રપદ્યે પ્રજાપતિમ્ ॥ ૧૯॥

અનાદ્યન્તં પરં બ્રહ્મ ન દેવા નર્ષયો વિદુઃ ।
એકોઽયં વેદ ભગવાન્ ધાતા નારાયણો હરિઃ ॥ ૨૦॥

નારાયણાદૃષિગણાસ્તથા સિદ્ધમહોરગાઃ ।
દેવા દેવર્ષયશ્ચૈવ યં વિદુઃ પરમવ્યયમ્ ॥ ૨૧॥

દેવદાનવગન્ધર્વા યક્ષરાક્ષસપન્નગાઃ ।
યં ન જાનન્તિ કો હ્યેષ કુતો વા ભગવાનિતિ ॥ ૨૨॥

યસ્મિન્ વિશ્વાનિ ભૂતાનિ તિષ્ઠન્તિ ચ વિશન્તિ ચ ।
ગુણીભૂતાનિ ભૂતેશે સૂત્રે મણિગણા ઇવ ॥ ૨૩॥

યસ્મિન્નિત્યે તતે તન્તૌ દૃઢે સ્રગિવ તિષ્ઠતિ ।
સદસદ્ગ્રથિતં વિશ્વં વિશ્વાઙ્ગે વિશ્વકર્મણિ ॥ ૨૪॥

હરિં સહસ્રશિરસં સહસ્રચરણેક્ષણમ્ ।
સહસ્રબાહુમુકુટં સહસ્રવદનોજ્જ્વલમ્ ॥ ૨૫॥

પ્રાહુર્નારાયણં દેવં યં વિશ્વસ્ય પરાયણમ્ ।
અણીયસામણીયાંસં સ્થવિષ્ટં ચ સ્થવીયસામ્ ॥ ૨૬॥

ગરીયસાં ગરિષ્ઠં ચ શ્રેષ્ઠં ચ શ્રેયસામપિ ।
ય વાકેષ્વનુવાકેષુ નિષત્સૂપનિષત્સુ ચ ॥ ૨૭॥

ગૃણન્તિ સર્વકર્માણં સત્વં સત્યેષુ સામસુ ।
ચતુર્ભિશ્ચતુરાત્માનં સત્વસ્થં સાત્ત્વતાં પતિમ્ ॥ ૨૮॥

યં દિવ્યૈર્દેવમર્ચન્તિ ગુહ્યૈઃ પરમનામભિઃ ।
યસ્મિન્નિત્યં તપસ્તપ્તં યદઙ્ગેષ્વનુતિષ્ઠતિ ॥ ૨૯॥

સર્વાત્મા સર્વવિત્ સર્વઃ સર્વગઃ સર્વભાવનઃ ।
યં દેવં દેવકી દેવી વસુદેવાદજીજનત્ ॥ ૩૦॥

ભૌમસ્ય બ્રહ્મણો ગુપ્ત્યૈ દીપ્તમગ્નિમિવારણિઃ ।
યમનન્યો વ્યપેતાસિરાત્માનં વીતકલ્મષમ્ ॥ ૩૧॥

ઇષ્ટ્વાનન્ત્યાય ગોવિન્દં પશ્યત્યાત્માનમાત્મનિ ।
અતિવાય્વિન્દ્રકર્માણમતિસૂર્યાગ્નિતેજસમ્ ॥ ૩૨॥

અતિબુધ્દીન્દ્રિયાત્માનં તં પ્રપદ્યે પ્રજાપતિમ્ ।
પુરાણે પુરુષં પ્રોક્તં બ્રહ્મ પ્રોક્તં યુગાદિષુ ॥ ૩૩॥

ક્ષયે સઙ્કર્ષણં પ્રોક્તં તમુપાસ્યમુપાસ્મહે ।
યમેકં બહુધાત્માનં પ્રાતર્ભૂતમધોક્ષજમ્ ॥ ૩૪॥

નાન્યભક્તાઃ ક્રિયાવન્તો યજન્તે સર્વકામદમ્ ।
યં પ્રાહુર્જગતઃ કોશં યસ્મિન્ સંવિહિતાઃ પ્રજાઃ ॥ ૩૫॥

યસ્મિન્ લોકાઃ સ્ફુરન્તીમે જલે શકુનયો યથા ।
ઋતમેકાક્ષરં બ્રહ્મ યત્તત્સદસતઃ પરમ્ ॥ ૩૬॥

અનાદિમધ્યપર્યન્તં ન દેવા નર્ષયો વિદુઃ ।

યં સુરાસુરગન્ધર્વસસિદ્ધર્ષિમહોરગાઃ ॥ ૩૭ ॥

પ્રયતા નિત્યમર્ચન્તિ પરમં દુઃખભેષજમ્ ।
અનાદિનિધનં દેવમાત્મયોનિં સનાતનમ્ ॥ ૩૮ ॥

અપ્રતર્ક્યમવિજ્ઞેયં હરિં નારાયણં પ્રભુમ્ ।
યં વૈ વિશ્વસ્ય કર્તારં જગતસ્તસ્થુષાં પતિમ્ ॥ ૩૯ ॥

વદન્તિ જગતોઽધ્યક્ષમક્ષરં પરમં પદમ્ ।
હિરણ્યવર્ણં યં ગર્ભમદિતેર્દૈત્યનાશનમ્ ।
એકં દ્વાદશધા જજ્ઞે તસ્મૈ સૂર્યાત્મને નમઃ ॥ ૪૦ ॥

શુક્લે દેવાન્ પિતૄન્ કૃષ્ણે તર્પયત્યમૃતેન યઃ ।
યશ્ચ રાજા દ્વિજાતીનાં તસ્મૈ સોમાત્મને નમઃ ॥ ૪૧ ॥

મહતસ્તમસઃ પારે પુરુષં હ્યતિતેજસમ્ ।
યં જ્ઞાત્વા મૃત્યુમત્યેતિ તસ્મૈ જ્ઞેયાત્મને નમઃ ॥ ૪૨ ॥

યં બૃહન્તં બૃહત્યુક્થ્યે યમગ્નૌ યં મહાધ્વરે ।
યં વિપ્રસઙ્ઘા ગાયન્તિ તસ્મૈ વેદાત્મને નમઃ ॥ ૪૩ ॥

ઋગ્યજુસ્સામધામાનં દશાર્ધં હવિરાત્મકમ્ ।
યં સપ્તતન્તું તન્વન્તિ તસ્મૈ યજ્ઞાત્મને નમઃ ॥ ૪૪ ॥

ચતુર્ભિશ્ચ ચતુર્ભિશ્ચ દ્વાભ્યાં પઞ્ચભિરેવ ચ ।
હૂયતે ચ પુનર્દ્વાભ્યાં તસ્મૈ હોમાત્મને નમઃ ॥ ૪૫ ॥

યઃ સુપર્ણો યજુર્નામ ચ્છન્દોગાત્રસ્ત્રિવૃચ્છિરાઃ ।
રથન્તરબૃહત્પક્ષસ્તસ્મૈ સ્તોત્રાત્મને નમઃ ॥ ૪૬ ॥

યઃ સહસ્રસવે સત્રે જજ્ઞે વિશ્વસૃજામૃષિઃ ।
હિરણ્યવર્ણઃ શકુનિઃ તસ્મૈ તાર્ક્ષ્યાત્મને નમઃ ॥ ૪૭ ॥

પદાઙ્ગં સન્ધિપર્વાણં સ્વરવ્યઞ્જનભૂષણમ્ ।
યમાહુશ્ચાક્ષરં નિત્યં તસ્મૈ વીર્યાત્મને નમઃ ॥ ૪૮ ॥

યજ્ઞાઙ્ગો યો વરાહો વૈ ભૂત્વા ગામુજ્જહાર હા ।
લોકત્રયહિતાર્થાય તસ્મૈ વીર્યાત્મને નમઃ ॥ ૪૯ ॥

યઃ શેતે યોગમાસ્થાય પર્યઙ્કે નાગભૂષિતે ।
ફણાસહસ્રરચિતે તસ્મૈ નિદ્રાત્મને નમઃ ॥ ૫૦ ॥

યશ્ચિનોતિ સતાં સેતુમૃતેનામૃતયોનિના ।
ધર્માર્થં વ્યવહારાર્થં તસ્મૈ સત્યાત્મને નમઃ ॥ ૫૧॥

યં પૃથગ્ધર્મચરણાઃ પૃથગ્ધર્મફલેષિણઃ ।
પૃથગ્ધર્મૈઃ સમર્ચન્તિ તસ્મૈ ધર્માત્મને નમઃ ॥ ૫૨॥

યતઃ સર્વે પ્રસૂયન્તે હ્યનઙ્ગાત્માઙ્ગદેહિનઃ (?) ।
ઉન્માદઃ સર્વભૂતાનાં તસ્મૈ કામાત્મને નમઃ ॥ ૫૩॥

યં તં વ્યક્તસ્થમવ્યક્તં વિચિન્વન્તિ મહર્ષયઃ ।
ક્ષેત્રે ક્ષેત્રજ્ઞમાસીનં તસ્મૈ ક્ષેત્રાત્મને નમઃ ॥ ૫૪॥

યં ત્રિધાત્માનમાત્મસ્થં વૃતં ષોડશભિર્ગુણૈઃ ।
પ્રાહુઃ સપ્તદશં સાઙ્ખ્યાસ્તસ્મૈ સાઙ્ખ્યાત્મને નમઃ ॥ ૫૫॥

યં વિનિદ્રાજિતશ્વાસાઃ શાન્તા દાન્તા જિતેન્દ્રિયાઃ ।
જ્યોતિઃ પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ યોગાત્મને નમઃ ॥ ૫૬॥

અપુણ્યપુણ્યઃ પરમે યં પુનર્ભવનિર્ભયાઃ ।
શાન્તાઃ સંન્યાસિનો યાન્તિ તસ્મૈ મોક્ષાત્મને નમઃ ॥ ૫૭॥

યોઽસૌ યુગસહસ્રાન્તે પ્રદીપ્તાર્ચિર્વિભાવસુઃ ।
સઙ્ક્ષોભયાતિ ભૂતાનિ તસ્મૈ ઘોરાત્મને નમઃ ॥ ૨૮॥

સમ્ભક્ષ્ય સર્વભૂતાનિ કૃત્વા ચૈકાર્ણવં જગત્ ।
બાલઃ સ્વપિતિ યશ્ચૈકસ્તસ્મૈ માયાત્મને નમઃ ॥ ૫૯॥

અજસ્ય નાભ્યાં સમ્ભૂતં યસ્મિન્ વિશ્વં પ્રતિષ્ઠિતમ્ ।
પુષ્કરં પુષ્કરાક્ષસ્ય તસ્મૈ પદ્માત્મને નમઃ ॥ ૬૦॥

સહસ્રશિરસે ચૈવ પુરુષાયામિતાત્મને ।
ચતુસ્સમુદ્રપર્યઙ્કે યોગનિદ્રાત્મને નમઃ ॥ ૬૧॥

યસ્ય કેશેષુ જીમૂતા નદ્યઃ સર્વાઙ્ગસન્ધિષુ ।
કુક્ષૌ સમુદ્રાશ્ચત્વારસ્તસ્મૈ તોયાત્મને નમઃ ॥ ૬૨॥

યસ્માત્ સર્વાઃ પ્રસૂયન્તે સર્ગપ્રલયવિક્રિયાઃ ।
યસ્મિંશ્ચૈવ પ્રલીયન્તે તસ્મૈ હેત્વાત્મને નમઃ ॥ ૬૩॥

યો નિષણ્ણો ભવેદ્રાત્રૌ દિવા ભવતિ વિષ્ઠિતઃ ।

ઇષ્ટાનિષ્ટત્ય ચ દ્રષ્ટા તસ્મૈ દ્રષ્ટ્રાત્મને નમઃ ॥ ૬૪॥

અકુણ્ઠં સર્વકાર્યેષુ ધર્મકાર્યાર્થમુદ્યતમ્ ।
વૈકુણ્ઠસ્ય હિ તદ્રૂપં તસ્મૈ કાર્યાત્મને નમઃ ॥ ૬૫॥

વિભજ્ય પઞ્ચધાત્માનં વાયુર્ભૂતશરીરગઃ ।
યશ્ચેષ્ટયતિ ભૂતાનિ તસ્મૈ વાય્વાત્મને નમઃ ॥ ૬૬॥

બ્રહ્મ વક્ત્રં ભુજૌ ક્ષત્રં કૃત્સ્નમૂરૂદરં વિશઃ ।
પાદૌ યસ્યાશ્રિતાઃ શૂદ્રાસ્તસ્મૈ વર્ણાત્મને નમઃ ॥ ૬૭॥

યુગેષ્વાવર્તતે યોગૈર્દિનર્ત્વયનહાયનૈઃ ।
સર્ગપ્રલયયોઃ કર્તા તસ્મૈ કાલાત્મને નમઃ ॥ ૬૮॥

યસ્યાગ્નિરાસ્યં દ્યૌર્મૂર્ધા ખં નાભિશ્ચરણૌ ક્ષિતિઃ ।
સૂર્યશ્ચક્ષુર્દિશઃ શ્રોત્રે તસ્મૈ લોકાત્મને નમઃ ॥ ૬૯॥

વિષયે વર્તમાનો યં તં વૈશેષિકનિર્ગુણૈઃ ।
પ્રાહુર્વિષયગોપ્તારં તસ્મૈ ગોપ્ત્રાત્મને નમઃ ॥ ૭૦॥

અન્નપાનેન્ધનમયો રસપ્રાણવિવર્ધનઃ ।
યો ધારયતિ ભૂતાનિ તસ્મૈ પ્રાણાત્મને નમઃ ॥ ૭૧॥

પ્રાણાનાં ધારણાર્થાય યોઽન્નં ભુઙ્ક્તે ચતુર્વિધમ્ ।
અન્તર્ભૂતઃ પચત્યગ્નિસ્તસ્મૈ પાકાત્મને નમઃ ॥ ૭૨॥

પિઙ્ગેક્ષણસટં યસ્ય રૂપં દંષ્ટ્રાનખાયુધમ્ ।
દાનવેન્દ્રાન્તકરણં તસ્મૈ દૃપ્તાત્મને નમઃ ॥ ૭૩॥

રસાતલગતઃ શ્રીમાનનન્તો ભગવાન્ વિભુઃ ।
જગદ્ધારયતે કૃત્સ્નં તસ્મૈ વીર્યાત્મને નમઃ ॥ ૭૪॥

યો મોહયતિ ભૂતાનિ સ્નેહપાશાનુબન્ધનૈઃ ।
સર્ગસ્ય રક્ષણાર્થાય તસ્મૈ મોહાત્મને નમઃ ॥ ૭૫॥

સુતલાતલમધ્યસ્થો હત્વા તુ મધુકૈટભૌ ।
ઉદ્ધૃતા યેન વૈ વેદાસ્તસ્મૈ મત્સ્યાત્મને નમઃ ॥ ૭૬॥

સસાગરનગાં બિભ્રત્ સપ્તદ્વીપાં વસુન્ધરામ્ ।
યો ધારયતિ પૃષ્ઠેન તસ્મૈ કૂર્માત્મને નમઃ ॥ ૭૭॥

એકાર્ણવે હિ મગ્નાં તાં વારાહં રૂપમાસ્થિતઃ ।
ઉદ્ધાર મહીં યોઽસૌ તસ્મૈ ક્રોડાત્મને નમઃ ॥ ૭૮॥

નારસિંહવપુઃ કૃત્વા યસ્ત્રૈલોક્યભયઙ્કરમ ।
હિરણ્યકશિપું જઘ્ને તસ્મૈ સિંહાત્મને નમઃ ॥ ૭૯॥

વામનં રૂપમાસ્થાય બલિં સંયમ્ય માયયા ।
ઇમે ક્રાન્તાસ્ત્રયો લોકાસ્તસ્મૈ ક્રાન્તાત્મને નમઃ ॥ ૮૦॥

જમદગ્નિસુતો ભૂત્વા રામઃ પરશુધૃત્ પ્રભુઃ ।
સહસ્રાર્જુનહન્તૈવ તસ્મા ઉગ્રાત્મને નમઃ ॥ ૮૧॥

રામો દાશરથિર્ભૂત્વા પૌલસ્ત્યકુલનન્દનમ્ ।
જઘાન રાવણં સઙ્ખ્યે તસ્મૈ ક્ષત્રાત્મને નમઃ ॥ ૮૨॥

વસુદેવસુતઃ શ્રીમાન્ વાસુદેવો જગત્પતિઃ ।
જહાર વસુધાભારં તસ્મૈ કૃષ્ણાત્મને નમઃ ॥ ૮૩॥

બુદ્ધરૂપં સમાસ્થાય સર્વધર્મપરાયણઃ ।
મોહયન્ સર્વભૂતાનિ તસ્મૈ મોહાત્મને નમઃ ॥ ૮૪॥

હનિષ્યતિ કલેરન્તે મ્લેચ્છાંસ્તુરગવાહનઃ ।
ધર્મસંસ્થાપનાર્થાય તસ્મૈ કલ્ક્યાત્મને નમઃ ॥ ૮૫॥

આત્મજ્ઞાનમિદં જ્ઞાનં જ્ઞાત્વા પઞ્ચસ્વવસ્થિતઃ ।
યં જ્ઞાનેનાધિગચ્છન્તિ તસ્મૈ જ્ઞાનાત્મને નમઃ ॥ ૮૬॥

અત્રમેયશરીરાય સર્વતો બુદ્ધિચક્ષુષે ।
અપારપરમેયાય તસ્મૈ દિવ્યાત્મને નમઃ ॥ ૮૭॥

જટિને દણ્ડિને નિત્યં લમ્બોદરશરીરિણે ।
કમણ્ડલુનિષઙ્ગાય તસ્મૈ બ્રહ્માત્મને નમઃ ॥ ૮૮॥

શૂલિને ત્રિદશેશાય ત્ર્યમ્બકાય મહાત્મને ।
ભસ્મદિગ્ધોર્ધ્વલિઙ્ગાય તસ્મૈ રુદ્રાત્મને નમઃ ॥ ૮૯॥

ચન્દ્રાર્ધકૃતશીર્ષાય વ્યાલયજ્ઞોપવીતિને ।
પિનાકશૂલહસ્તાય તસ્મા ઉગ્રાત્મને નમઃ ॥ ૯૦॥

પઞ્ચભૂતાત્મભૂતાય ભૂતાદિનિધનાય ચ ।
અક્રોધદ્રોહમોહાય તસ્મૈ શાન્તાત્મને નમઃ ॥ ૯૧॥

યસ્મિન્ સર્વં યતઃ સર્વં યઃ સર્વં સર્વતશ્ચ યઃ ।
યશ્ચ સર્વમયો દેવસ્તસ્મૈ સર્વાત્મને નમઃ ॥ ૯૨॥

વિશ્વકર્મન્નમસ્તેઽસ્તુ વિશ્વાત્મન્ વિશ્વસમ્ભવ ।
અપવર્ગસ્થ ભૂતાનાં પઞ્ચાનાં પુરતઃ સ્થિત ॥ ૯૩॥

નમસ્તે ત્રિષુ લોકેષુ નમસ્તે પરતસ્ત્રિષુ ।
નમસ્તે દિક્ષુ સર્વાસુ ત્વં હિ સર્વમયો નિધિઃ ॥ ૯૪॥

નમસ્તે ભગવન્ વિષ્ણો લોકાનાં પ્રભવાપ્યયમ્ ।
ત્વં હિ કર્તા હૃષીકેશ સંહર્તા ચાપરાજિતઃ ॥ ૯૫॥

તેન પશ્યામિ ભગવન્ દિવ્યેષુ ત્રિષુ વર્ત્મસુ ।
તચ્ચ પશ્યામિ તત્ત્વેન યત્તે રૂપં સનાતનમ્ ॥ ૯૬॥

દિવં તે શિરસા વ્યાપ્તં પદ્ભ્યાં દેવી વસુન્ધરા ।
વિક્રમેણ ત્રયો લોકાઃ પુરુષોઽસિ સનાતનઃ ॥ ૯૭॥

દિશો ભુજા રવિશ્ચક્ષુર્વીર્યં શુક્રઃ પ્રજાપતિઃ ।
સપ્તમાર્ગા નિરુદ્ધાસ્તે વાયોરમિતતેજસઃ ॥ ૯૮॥

અતસીપુષ્પસઙ્કાશં પીતકૌશેયવાસસમ્ ।
નમસ્યન્તિ ચ ગોવિન્દં ન તેષાં વિદ્યતે ભયમ્ ॥ ૯૯॥

નમો નરકસન્ત્રાસરક્ષામણ્ડલકારિણે ।
સંસારનિમ્નગાવર્તતરિકાષ્ઠાય વિષ્ણવે ॥ ૧૦૦॥

નમો બ્રહ્મણ્યદેવાય ગોબ્રાહ્મણહિતાય ચ ।
જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમો નમઃ ॥ ૧૦૧॥

પ્રાણકાન્તારપાથેયં સંસારચ્છેદભેષજમ્ ।
દુઃખશોકપરિત્રાણં હરિરિત્યક્ષરદ્વયમ્ ॥ ૧૦૨॥

યથા વિષ્ણુમયં સત્યં યથા વિષ્ણુમયં જગત્ ।
યથા વિષ્ણુમયં સર્વં પાપં મે નશ્યતાં તથા ॥ ૧૦૩॥

ત્વાં પ્રપન્નાય ભક્તાય ગતિમિષ્ટાં જિગીષવે ।
યચ્છ્રેયઃ પુણ્ડરીકાક્ષં તં ધ્યાયસ્વ સુરેશ્વરમ્ ॥ ૧૦૪॥

ઇતિ વિદ્યાતપોયોનિરયોનિર્વિષ્ણુરીડિતઃ ।

વાગ્યજ્ઞેનાર્ચિતો દેવઃ પ્રીયતાં મે જનાર્દનઃ ॥ ૧૦૫॥

નારાયણં પરં બ્રહ્મ નારાયણપરં તપઃ ।
નારાયણપરં ચેદં સર્વં નારાયણાત્મકમ્ ॥ ૧૦૬॥

વૈશમ્પાયન ઉવાચ-
એતાવદુક્ત્વા વચનં ભીષ્મસ્ત્વાહતમાનસઃ ।
નમ ઇત્યેવ કૃષ્ણાય પ્રણામમકરોત્તદા ॥ ૧૦૭॥

અધિગમ્ય તુ યોગેન ભક્તિં ભીષ્મસ્ય માધવઃ ।
ત્રૈલોક્યદર્શનં જ્ઞાનં દિવ્યં દત્ત્વા યયૌ હરિઃ ॥ ૧૦૮॥

તસ્મિન્નુપરતે શબ્દે તતસ્તે બ્રહ્મવાદિનઃ ।
ભીષ્મં વાગ્ભિર્બાષ્પકણ્ઠાસ્તમાનર્ચુર્મહામતિમ્ ॥ ૧૦૯॥

તે સ્તુવન્તશ્ચ વિપ્રાગ્ર્યાઃ કેશવં પુરુષોત્તમમ્ ।
ભીષ્મં ચ શનકૈઃ સર્વે પ્રશશંસુઃ પુનઃ પુનઃ ॥ ૧૧૦॥

યં યોગિનઃ પ્રાણવિમોક્ષકાલે
    યત્નેન ચિત્તે વિનિવેશયન્તિ ।
સાક્ષાત્પુરસ્તાદ્ધરિમીક્ષમાણઃ
    પ્રાણાન્ જહૌ પ્રાપ્તકાલો હિ ભીષ્મઃ ॥ ૧૧૧॥

શુક્લપક્ષે દિવા ભૂમૌ ગઙ્ગાયાં ચોત્તરાયણે ।
ધન્યાસ્તાત મરિષ્યન્તિ હૃદયસ્થે જનાર્દને ॥ ૧૧૨॥

વિદિત્વા ભક્તિયોગં તુ ભીષ્મસ્ય પુરુષોત્તમઃ ।
સહસોત્થાય સન્તુષ્ટો યાનમેવાન્વપદ્યત ॥ ૧૧૩॥

કેશવઃ સાત્યકિશ્ચૈવ રથેનૈકેન જગ્મતુઃ ।
અપરેણ મહાત્માનૌ યુધિષ્ઠિરધનઞ્જયૌ ॥ ૧૧૪॥

ભીમસેનો યમૌ ચોભૌ રથમેકં સમાસ્થિતાઃ ।
કૃપો યુયુત્સુઃ સૂતશ્ચ સઞ્જયશ્ચાપરં રથમ્ ॥ ૧૧૫॥

તે રથૈર્નગરાકારૈઃ પ્રયાતાઃ પુરુષર્ષભાઃ ।
નેમિઘોષેણ મહતા કમ્પયન્તો વસુન્ધરામ્ ॥ ૧૧૬॥

તતો ગિરઃ પુરુષવરૈઃ સ્તવાન્વિતા
    દ્વિજેરિતાઃ પથિ સુમનાઃ સુશુશ્રુવે ।

કૃતાઞ્જાલેં પ્રણતમથાપરં જનં
    સ કેશિહા મુદિતમનાભ્યનન્દત્ ॥ ૧૧૭॥

અનાદિનિધનં વિષ્ણું સર્વલોકમહેશ્વરમ્ ।
ધર્માધ્યક્ષં સ્તુવન્નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૧૮॥

ઇમં સ્તવં યઃ પઠતિ શાર્ઙ્ગધન્વનઃ
    શ઼ૃણોતિ વા ભક્તિસમન્વિતો જનઃ ।
સ ચક્રધૃત પ્રતિહતદગ્ધકલ્મષો
    જનાર્દનં પ્રવિશતિ દેહસઙ્ક્ષયે ॥ ૧૧૯॥

અશનિશિતસુધારં યસ્ય ચક્રં સુચારુ
    મણિકનકવિચિત્રે કુણ્ડલે યસ્ય કર્ણે ।
ભ્રમરશતસહસ્રૈઃ સેવિતા યસ્ય માલા
    અસુરકુલનિહન્તા પ્રીયતાં વાસુદેવઃ ॥ ૧૨૦॥

સ્તવરાજઃ સમાપ્તોઽયં વિષ્ણોરદ્ભુતકર્મણઃ ।
ગાઙ્ગેયેન પુરા ગીતો મહાપાતકનાશનઃ ॥ ૧૨૧॥

શ્રીભગવાનુવાચ -
યઃ પઠેત ઇદં સ્તોત્રં મમ જન્માનુકીર્તનમ્ ।
દેવલોકમતિક્રમ્ય તસ્ય લોકો યથા મમ ॥ ૧૨૨॥

ઇતિ શ્રીમહાભારતાન્તર્ગતઃ શ્રીવિષ્ણુસ્તવરાજઃ અથવા
ભીષ્મસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by Rajesh Thyagarajan

---

*Shri Vishnu Stavaraja 2*
pdf was typeset on February 9, 2024

Please send corrections to *sanskrit@cheerful.com*